अनुक्रमांकः ..................................

निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS 103**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा - दिसम्बरमासः - 2017

## एम.ए. संस्कृतम्, (सत्रम् : प्रथमम्)

## भारतीयदर्शनम्

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रं 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्ड-क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** 'क' खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. तर्कसंग्रहमाधृत्य प्रत्यक्षप्रमाणस्य स्वरूपं सोदाहरणं स्पष्टीक्रियताम्।
2. 'योगश्चित्तवृत्तिनिरोधः' इति सूत्रं विशदं व्याख्यायताम्।
3. अष्टाङ्गयोगः भेदनिश्चयपूर्वकं साधु सन्दर्श्यताम्।
4. साङ्ख्यसम्मतः सत्कार्यवादः कारिकोद्धरणपूर्वकं सम्यङ्निरूप्यताम्।
5. साङ्ख्यदर्शनं पुरुषबहुत्वं स्वीकरोति पुरुषैकत्वं वा? इति स्वाधीतग्रन्थदिशा निर्णीयताम्।

### खण्ड-ख
### (लघूत्तरीयप्रश्नाः)

**निर्देशः** 'ख' खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. तर्कसङ्ग्रहोक्तपदार्थानां नामान्युल्लिख्य द्रव्यपदार्थस्य परिचयो दीयताम्।
2. अन्नम्भट्टदिशा उपमानप्रमाणं साधूपवर्ण्यताम्।
3. पातञ्जलयोगसूत्रदिशा ईश्वरस्य स्वरूपं विविच्यताम्।
4. 'सति मूले तद्विपाको जात्यायुर्भोगः' इति सूत्रं साधु व्याख्यायताम्।
5. हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्। सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्।। - इति कारिकाया आशयः सम्यक् सन्दर्श्यताम्
6. रूपैः सप्तभिरेव बध्नात्यात्मानमात्मना प्रकृतिः। सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण।। - इति कारिकायाः प्रतिपाद्यं निपुणं निभाल्यताम्।।

## खण्ड-ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** 'ग' खण्डे दशलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×1=10)**

1. अन्नम्भट्टमतेन गुणानां सङ्ख्या अस्ति.........................
   (अ) पञ्च (ब) दश
   (स) चतुर्विंशतिः (द) त्रिंशत्
2. अपां लक्षणमस्ति..................................
   (अ) शीतस्पर्शवत्यः (ब) उष्णतायुक्तः
   (स) गन्धवत्यः (द) शब्दवत्यः
3. श्रोत्रेण शब्दसाक्षात्कारे सन्निकर्षो भवति...............................
   (अ) संयोगः (ब) समवायः
   (स) संयुक्तसमवायः (द) समवेतसमवायः
4. 'अथ योगानुशासनम्' इत्यत्र 'अथ' शब्दस्य अर्थोऽस्ति..............................
   (अ) प्रारम्भः (ब) आनन्तर्यम्
   (स) समाप्तिः (द) व्याख्यानम्
5. योगदर्शनस्य प्रणेताऽस्ति.................................
   (अ) शङ्कराचार्यः (ब) पतञ्जलिः
   (स) धन्वन्तरिः (द) गौतमः
6. 'योगदर्शने कर्णितः पुरुषः अस्ति...........................
   (अ) जडः (ब) आनन्दमयः
   (स) दुःखमयः (द) चेतनः
7. साङ्ख्यशास्त्रे तत्त्वानां संङ्ख्याऽस्ति.......................
   (अ) विंशतिः (ब) चत्वारिंशत्
   (स) पञ्चविंशतिः (द) एकत्रिंशत्
8. ईश्वरकृष्णस्य मते प्रमाणानि सन्ति...................
   (अ) त्रीणि (ब) अष्टौ
   (स) चत्वारि (द) पञ्च
9. तन्मात्राणां सङ्ख्या स्वीक्रियते साङ्ख्यैः..............................
   (अ) दश (ब) सप्त
   (स) पञ्च (द) षट्
10. साङ्ख्यदर्शने मोक्षो भवति.......................
   (अ) वैराग्येण (ब) कर्मणा
   (स) ज्ञानेन (द) धर्मेण

--------------x--------------